चित्रकः । व्याघ्रः । इति राजनिर्घण्टः ॥ (यथा, रामायणे । २ । ६४ । ७ ।

"नानामृगगणैर्द्वीपितरक्ष्वृक्षगणैर्वृतः ॥")

द्वीप्यः, त्रि, द्वीपे भव इत्यर्थे यत्प्रत्ययः ॥ ("तत्र भवः ।" ४ । ३ । ५३ । इति यत् । ) द्वैप्यः । (यथा, वाजसनेयसंहितायाम् । १६ । ३१ ।

"नमो नादेयाय च द्वीप्याय च ॥")

द्वृ, स्थगने । इति कविकल्पद्रुमः ॥ ( भ्वां-परं-सकं-अनिट् ।) वकारोपधः । द्वरति । स्थगनं संवरणम् । वरणे इति प्राञ्चः । वरणं स्वीकारः स्थगनञ्चेति गोविन्दभट्टः । इति दुर्गादासः ॥

द्वेधा, व्य, ( द्वि+"संख्याया विधार्थे धा ।" ५ । ३ । ४२ । इति धा । "एधाच्च ।" ५ । ३ । ४५ । इति तस्य एधाच् ।) द्विप्रकारम् । इति व्याकरणम् ॥

द्वेषः, पुं, ( द्विष+भावे घञ् । ) शत्रुता । तत्पर्य्यायः । वैरम् २ विरोधः ३ विद्वेषः ४ द्वेषणम् ५ । इति शब्दरत्नावली ॥ ( यथा, मनुः । ४ । १६३ ।

"नास्तिक्यं वेदनिन्दाञ्च देवतानाञ्च कुत्सनम् ।
द्वेषं दम्भञ्च मानञ्च क्रोधं तैक्ष्ण्यञ्च वर्ज्जयेत् ॥")

अस्य कारणं द्विष्टसाधनताज्ञानम् । इति भाषापरिच्छेदः ॥ स च आत्मनो विशेषगुणः । इति सिद्धान्तमुक्तावली ॥ तदवशवर्त्तित्वनिषेधो यथा, श्रीभगवद्गीतायाम् । ३ । ३४ ।

"इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत् तौ ह्यस्य परिपन्थिनौ ॥"

"इन्द्रियस्येन्द्रियस्येति वीप्सया सर्व्वेषामिन्द्रियाणां प्रत्येकमित्युक्तम् । अर्थे स्वस्वविषये अनुकूले रागः प्रतिकूले द्वेषः इत्येवं रागद्वेषौ व्यवस्थितौ अवश्यम्भाविनौ ।" इति तट्टीकायां श्रीधरस्वामी ॥

द्वेषणं, क्ली, ( द्विष+भावे ल्युट् । ) द्वेषः । इति शब्दरत्नावली ॥ (यथा, महाभारते ।५।६१।२७।

"अकस्माच्चैव पार्थानां द्वेषणं नोपपद्यते ॥" )

द्वेषणः, त्रि, ( द्विष+"क्रुधमण्डार्थेभ्यश्च ।" ३ । २ । १५१ । इति युच् । ) शत्रुः । इत्यमरः । २।८।१०॥ ( यथा, महाभारते ।१२।१६८।१५।

"पानपो द्वेषणः क्रोधी निर्घृणः परुषस्तथा ॥")

द्वेषी, [न्] त्रि, ( द्वेष्टि तच्छीलः । द्विष+"संपृचानुरुधेति ।" ३ । २ । १४२ । इति घिनुण् । ) शत्रुः । इति हेमचन्द्रः । ३ । ३९३ ॥ ( यथा, रघुः । १७ । ७३ ।

"तथापि ववृधे तस्य तत्कारिद्वेषिणो यशः ॥")

द्वेष्टा, [ऋ] त्रि, ( द्वेष्टीति । द्विष+तृच् । ) विद्वेषकर्त्ता । इति द्विषधातोस्तृन्प्रत्ययेन साध्यः ॥ ( यथा, महाभारते । १ । ४६ । ६ ।

"द्वेष्टारस्तस्य नैवासन् स च द्वेष्टि न कञ्चन ॥")

द्वेष्यः, त्रि, ( द्वेष्टुमर्हः । यत् । ) द्वेषविषयः । विद्वेषार्हः । तत्पर्य्यायः । अक्षिगतः २ । इत्यमरः । ३ । १ । ४५ ॥ ( यथा, महाभारते । ४ । १६ । १८ ।

"सुखं वा यदि वा दुःखं द्वेष्यं वा यदि वा प्रियम् ।
यथावत् सर्व्वमाचक्ष्व श्रुत्वा धास्यामि यत्क्षमम् ॥"

द्विष्यतेऽसाविति । द्विष+ण्यत् । शत्रुः । यथा, रघुः । १ । २८ ।

"द्वेष्योऽपि सम्मतः शिष्टस्तस्यार्त्तस्य यथौषधम् ।
त्याज्यो दुष्टः प्रियोऽप्यासीदङ्गुलीवोरगक्षता ॥")

द्वैगुणिकः, त्रि, ( द्विगुणार्थं द्रव्यं द्विगुणम् । तत् प्रयच्छति द्विगुणं ग्रहीतुमेकगुणं ददातीत्यर्थः । द्विगुण+"प्रयच्छति गर्ह्यम् ।" ४ । ४ । ३० । इति ठक् । ) वृद्ध्याजीवः । इति हेमचन्द्रः । ३ । ५४४ ॥ द्विगुणं गृह्णाति यः इत्यर्थे ष्णिक-प्रत्ययः ॥

द्वैतं, क्ली, (द्विधा इतं द्वीतम् । तस्य भावः । युवादित्वात् अण् । स्वार्थे अण् वा । ) द्वयम् । इति हेमचन्द्रः ।६।६०॥ ( यथा, भागवते ।१।१५।३०।

"विशोको ब्रह्मसम्पत्त्या संछिन्नद्वैतसंशयः ।
लीनप्रकृतिनैर्गुण्यादलिङ्गत्वादसम्भवः ॥" )

लोकादिरूपम् । एकायनोऽसावितिश्लोकव्याख्यायां श्रीधरस्वामी ॥ ( वनविशेषः ॥ गतद्विके, त्रि । यथा, किराते । १ । १ ।

"सवर्णिलिङ्गी विदितः समाययौ
युधिष्ठिरं द्वैतवने वनेचरः ॥"

"द्वैतवने द्वैताख्ये तपोवने । यद्वा, द्वे इते गते यस्मात् तत् द्वीतम् । द्वीतमेव द्वैतं तच्च तद्वनञ्चेति तस्मिन् । शोकमोहादिरहिते इत्यर्थः ॥" इति तट्टीकायां मल्लिनाथः ॥ )

द्वैतवादी, [न्] त्रि, ( द्वैतं जीव ईश्वरश्चेति द्वयं वदतीति । वद+णिनिः । ) जीवेश्वरयोर्भेदवादी । ईश्वरातिरिक्तजीववक्ता । तस्य मतं यथा, परमात्मनो जीवात्मा पृथक् तन्मध्ये केषाञ्चिन्मते प्रकृतिरतिरिक्ता केषाञ्चिन्मते प्रकृतिरदृष्टमात्रे पर्य्यवसिता एवं जीवश्च पृथक् । अत्र प्रमाणम् ।

जन्मकर्म्ममरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।
पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्य्ययाच्चैव ॥

इति साङ्ख्यमतम् ॥

तत्रेश्वरः सर्व्वज्ञः परमात्मा एक एव । जीवः प्रतिशरीरं भिन्नः विभुर्नित्यश्च । इति गौतममतम् ॥

इह ब्रह्मणो जीवेतरत्वप्रतिपादनात् तयोरद्वैतं नाभिमतम् । नेतरोऽनुपपत्तेर्भेदव्यपदेशाच्च मुक्तोपसृप्यव्यपदेशादाकाशोऽर्थान्तरत्वादिव्यपदेशाद्भोगमात्रसाम्यलिङ्गाच्चेति सूत्रैर्मोक्षेऽपि तयोर्द्वैतनिरूपणाच्च । इति गोविन्दभाष्यमतम् ॥

यतो द्वैतमते युक्तिरेव प्रमाणं युक्त्या यत् फलति तदेव सर्व्वाध्यात्मविद्याप्रतिपादकश्रुतीनां तात्पर्य्यम् । इति रामानुजमतञ्च ॥

द्वैतीयीकः, त्रि, ( द्वितीय+तीयादीकक् । स्वार्थे वा ईकक् । ) द्वितीयः । यथा,—

"द्वैतीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः ॥"

इति नैषधम् । २ । ११० ॥

द्वैधं, व्य, ( द्वि+"संख्याया विधार्थे धा ।" ५ । ३ । ४२ । इति धा । "द्वित्र्योश्च धमुञ् ।" ५ । ३ । ४५ । इति धा इत्यस्य धमुञ् ।) द्विप्रकारम् । इति व्याकरणम् ॥ (यथा, हरिवंशे । १ । ३० ।

"तदण्डमकरोद्द्वैधं दिवं भुवमथापि च ॥"

क्ली, "धमुञन्तात् स्वार्थे डदर्शनम् ।" इति वार्त्तिकोक्त्या डः । राज्ञां षड्गुणानामन्यतमः । इत्यमरः । २ । ८ । १८ ॥ ) एकेन सन्धिरपरेण विग्रहः इति द्वौ प्रकारौ द्वैधं निपातितम् । इत्यमरटीकायां भरतः ॥ ( तच्च द्विविधम् । यथा, मनुः । ७ । १६७ ।

"बलस्य स्वामिनश्चैव स्थितिः कार्य्यार्थसिद्धये ।
द्विविधं कीर्त्त्यते द्वैधं षाड्गुण्यगुणवेदिभिः ॥")

विवादः । इति त्रिकाण्डशेषः ॥ ( द्विप्रकारम् । यथा, मनुः । ८ । ७३ ।

"बहुत्वं परिगृह्णीयात् साक्षिद्वैधे नराधिपः ।
समेषु तु गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् ॥"

त्रि । यथा, "पथि द्वैधानि तृणानि ।" इति सिद्धान्तकौमुदी ॥ )

द्वैपः, पुं, (द्वीपिनो विकारः द्वैपम् । द्वीप+"प्राणिरजतादिभ्योऽञ् ।" ४ । ३ । १५४ । इति अञ् । तेन परिवृतः । "द्वैपवैयाघ्रादञ् ।" ४ । २ । १२ । इत्यञ् । ) द्वीपिचर्म्मावृतरथः । इत्यमरः । २ । ८ । ५३ ॥ द्वीपसम्बन्धिनि व्याघ्रचर्म्मसम्बन्धिनि च त्रि ॥ ( यथा, सुश्रुते चिकित्सितस्थाने ६ अध्याये ।

"द्वैपं दग्धं चर्म्म मातङ्गजं वा
भिन्ने स्फोटे तैलयुक्तं प्रलेपः ॥" )

द्वैपायनः, पुं, ( द्वीपं अयनं उत्पत्तिस्थानं यस्य । स एव । स्वार्थे प्रज्ञादित्वात् वा अण् । ) व्यासः । इति हेमचन्द्रः । ३ । ५११ ॥ ( संनिरुक्तिरस्य जन्मकथा यथा महाभारते ।१।६३।८३—८५।

"इति सत्यवती हृष्टा लब्ध्वा वरमनुत्तमम् ।
पराशरेण संयुक्ता सद्यो गर्भं सुषाव सा ॥
जज्ञे च यमुनाद्वीपे पाराशर्य्यः स वीर्य्यवान् ।
स मातरमनुज्ञाप्य तपस्येव मनो दधे ॥
स्मृतोऽहं दर्शयिष्यामि कृत्येष्विति च सोऽब्रवीत् ॥
एवं द्वैपायनो जज्ञे सत्यवत्यां पराशरात् ।
न्यस्तो द्वीपे स यद्बालस्तस्माद्द्वैपायनः स्मृतः ॥"

ह्रदविशेषः । अत्र दुर्य्योधनः पाण्डवभयात् आत्मानं स्तम्भयित्वा स्थितः । यथा, महाभारते । ९ । ३१ । २ ।

"आसाद्य च कुरुश्रेष्ठ ! तदा द्वैपायनं ह्रदम् ।
स्तम्भितं धार्त्तराष्ट्रेण दृष्ट्वा तं सलिलाशयम् ।
वासुदेवमिदं वाक्यमब्रवीत् कुरुनन्दनः ॥" )

द्वैप्यं, त्रि, ( द्वीपे भवम् द्वीपस्य इदम् वा । द्वीप+"द्वीपादनुसमुद्रं यञ् ।" ४ । ३ । १० । इति यञ् । ) द्वीपसम्बन्धि । द्वीपशब्दात् इदमर्थे